# अर्थशास्त्रम्(विद्यासमुद्देशः)

रविनः आचार्यः
स्याक्ट-शिक्षकः
संस्कृत-विभागः
शालतोडा नेताजी सेन्टेनारी महाविद्यालयः
शालतोडा,वांकुडा,पश्चिमवङ्ग

# अर्थशास्त्रस्य परिचयः

कौटिल्यप्रणीतम् अर्थशास्त्रम् प्राचीन भारतस्य राजनीति विषयक एक : महत्त्वपूर्णग्रन्थः अस्ति ।कौटिलस्य गौरवगाथा पुराणेषु इतिहासेषु च सर्वत्र सुप्रसिद्धाऽस्ति ।कौटिल्य नन्दवंशस्य समूलोच्छेदं कृत्वा मौर्य साम्राज्यस्य स्थापनां कृतवान् ।अस्य अपर नामे विष्णुगुप्तः चाणक्यश्चापि समुपलभ्यते ।

अर्थशास्त्रं परिभाषयन् कौटिल्यः स्वकीये ग्रन्थे अर्थशाखे लिखति - **' मनुष्याणां वृत्तिरर्थः , मनुष्यवती भूमिरित्यर्थः तस्याः पृथिव्याः लाभपालनोपायः शास्त्रम् अर्थशास्त्रम् इति ।**अर्थशास्त्रमिदं राजनीतिविज्ञानस्य विश्वकोश इत्युच्यते विद्वद्भिः । ग्रन्थेऽस्मिन् धर्मशास्त्रम् , नीतिशास्त्रम् , शिक्षाशास्त्रम् , समाजशास्त्रम् , कृषिविज्ञानम् , चिकित्साशास्त्रम् , तन्त्रशास्त्रम् इत्यादिकं सर्वं वर्णितमस्ति । अर्थशास्त्रमिदं **15 अधिकरणेषु , 150 अध्यायेषु , 180 प्रकारणेषु** च विभक्तमस्ति ।

# विद्यासमुद्देश :

## (आन्वीक्षिकीस्थापना)

**"आन्वीक्षिकी त्रयो वार्ता दण्डनीतिश्चेति विद्याः" ।**

-का नाम विद्या ? इत्यस्य स्वरूपसामान्य संक्षेपेण निरूपयति कौटिल्यः यत् वेद्यते अनया इति विद्याः ।आन्वीक्षिकी त्रयी वार्ता दण्डनीतिश्चेति विद्याः।

**"त्रयी, वार्ता, दण्डनीतिश्चेति मानवाः । त्रयोविशेषो ह्यान्वोकोति"-**

तत्र मानवाः , त्रयी वार्ता दण्डनीतिश्च तिस्रः विद्याः स्वीकुर्वन्ति यतो हि त्रयी विशेषो ह्यान्वीक्षिकीति ।

**"वार्ता दण्डनीतिश्चेति बार्हस्पत्याः ।संवरणमात्र हि त्रयी लोकयात्राविद इति" ।**

वार्ता दण्डनीतिश्चेति बार्हस्पत्याः यतो हि संवरणमात्रं त्रयी लोकयात्राविद इति ।

"दण्डनतिरेका विद्येचौशनसाः ।तस्यां हि सर्वविद्यारम्भाः प्रतिवद्धा इति" ।

औशनसाः शुक्राचार्यानुयायिनस्तु एकामेव विदयाम् स्वीकुर्वन्ति , या दण्डनीतिरित्युच्च्यते ; तस्यां हि सर्वविद्यारम्भाः प्रतिबद्धाः इति ।

**"चतस्र एव विद्या इति कौटिल्यः । ताभिर्धमार्थौ यद्विद्यात् तद्विद्यानां विद्यात्वम् " ।**

आचार्यकौटिल्यस्य मतानुसारं चतस्र विद्या अस्ति । यथा आन्वीक्षिकी, त्रयी,वार्ता दण्डनीतिश्च ।ताभिः विद्याभिः धर्मार्थौ यद् विद्यात् तद् विद्यानां विद्यात्वम् ।

सांख्यं योग लोकायतं चेत्यान्वीक्षिकी । धर्माधर्मौ त्रय्याम् अर्थानर्थौ वार्तायां नयापनयौ दण्डनीत्याम् । बलावले चैतासां हेतुभिरन्वीक्षमाणा आन्वीक्षिकी लोकस्योपकरोति, व्यसनेऽभ्युदये च बुद्धिमवस्थास्यति प्रज्ञावाक्यक्रियावैशारद्यं च करोति ।

**प्रदीपः सर्वविद्यानामुपायः सर्वकर्मणाम् ।**
**आश्रयः सर्वधर्माणां शश्वदान्वीक्षकी मता ॥ ॥ इति**

अत्र आन्वीक्षिकी नाम तर्कविद्या अर्थात् यया विद्यया उचितानुचितं तर्कपुरस्सरं ज्ञायते सा विद्या आन्वीक्षिकीति कथ्यते । अर्थशास्त्रकारः कौटिल्य : लिखति - बलावले चैतासां हेतुभिः अन्वीक्षमाणा आन्वीक्षिकी लोकस्य उपकरोति । व्यसने अभ्युदये च बुद्धिम् अवस्थापयति प्रज्ञावाक्यक्रिया - वैशारद्यं च करोति । अत एव आन्वीक्षिकी मानवमात्रस्य सर्वविधोपकार सर्वांगीण -विकास वा करोति ।

आन्वीक्षिकी सर्वविदयानां प्रदीप इव । यथा प्रदीपः तस्य क्षीणालोकेन अन्धकारं अपसारयति तथैव आन्वीक्षिकी विद्या ।आन्वीक्षिकी सर्वधर्माणां आश्रयः उच्यते, सर्वकर्मणाम्  उपायो कथ्यते ।एतेषां सर्वेषांसमाहारः आन्वीक्षिकी विद्यायाम् उपलभ्यते ।

# धन्यवाद: